**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 6.471
Volume - 6, Issue - 8, August - 2023 Publication Date: 31/08/2023

DOIs:10.2018/SS/202308018 --:-- Research Paper / Article / Review

# प्रत्यक्षप्रमाणलक्षणसूत्रे व्याकरणघटितन्यायसिद्धान्ताः

**Sukumar Bagdi**
PhD Scholar, Department of Sanskrit, Ramakrishna Mission Vidyamandira
Belur Math, Howrah-711202, West Bengal, India
Email – sukumarrst143@gmail.com

**शोधसारः** दर्शनशास्त्रेषु आन्यतम्यं भजते न्यायदर्शनम्। तत्र महर्षिणा सूत्रैः अतिगूढतत्त्वानाम् आलोचनं क्रियते। तत्रत्यानां सूत्राणाम् अर्थावबोधने व्याकरणशास्त्रस्य गुरुत्वं न केनापि निराकर्तुं शक्यते। क्वचित् एवं भवति, व्याकरणशास्त्रस्य ज्ञानाभावात् यथार्थरूपेण सूत्रार्थम् अवगन्तुं न शक्यते। शोधेऽस्मिन् प्रत्यक्षप्रमाणलक्षणसूत्रे वर्तमानानां व्याकरणविषयानां आलोचनं क्रियते। तत्र प्रत्यक्षशब्दे समासः तावत् अव्ययीभावसमासः। अक्षम् अक्षं प्रति वर्तते इति विग्रहे अत्र अव्ययीभावसमासः अभवत्। ततश्च प्रत्यक्षशब्दस्य निष्पत्तेः अनन्तरं ‘परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः’ इति महर्षिसूत्रबलात् लिङ्गं परवत् भवति नाम उत्तरपदस्य समानवत् भवति। तथाहि अक्षशब्दस्य नपुंसके वर्तमानत्वात् प्रत्यक्षशब्देऽपि तथैव भवति। किञ्च प्रकृतन्यायसूत्रे प्रत्यक्षप्रमाणस्य प्रत्यक्षप्रमायाः वा लक्षणं क्रियते इति शिष्यसंशयं दूरीकरणाय ‘यतः’ इति पदस्य अध्याहारः क्रियते इति विदुषां राद्धान्तः।

**कुञ्चीशब्दाः** प्रत्यक्षप्रमाणम्, अव्ययीभावः, बहुव्रीहिः, ज्ञानाकरणकम्, इन्द्रियार्थसन्निकर्षः ।

## 1. भूमिका :

**प्रमाणाय नमः**

भारतीयदर्शनपरम्परायां प्रायेण सर्वेषामेव दर्शनशास्त्राणां मोक्षस्तावत् परमपुरुषार्थः। वृहदारण्यकोपनिषदि आम्नातं-

“आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्”[1] इति।

अत्र श्रतितः कृतात्मश्रवणस्य मननेऽधिकारः, मननञ्चात्मनः इतरभेदत्वेनानुमानम् ।श्रत्या देहादिविलक्षणात्मज्ञाने सत्यपि असम्भावनानिवृत्तेः युक्त्यनुसन्धानरूपमननसाध्यत्वात् मननोपयोगिपदार्थनिरूपणद्वारा इह शास्त्रस्यापि मोक्षोपयोगित्वम् ।

श्रवणं नाम आत्मविषयकं श्रतिवाक्यश्रवणम् । तथाहि आम्नातं – “श्रोतव्यं श्रुतिवाक्येभ्यः” इति ।

“..........श्रवण नाम केवलं
उपक्रमणादिभिर्लिङ्गैः शक्तितात्पर्यनिर्णयः”[2]

तदनन्तरं द्वितीया श्रुतस्य परीक्षा यामाहुर्मननमिति । मननञ्च उपपत्त्या कर्तव्यम् । तथाहि आम्नातं ...“मन्तव्यश्चोपपत्तिभिः”इति ।

सर्ववेदान्तवाक्यानामाचार्यमुखतः प्रियात्।
वाक्यानुग्राहकन्यायशीलनं मननं भवेत् ।।[3]

---

[1] बृहदारण्यकोपनिषत्,गीताप्रेस,पृ.1130
[2] विवरणप्रमेयसारसंग्रहः
[3] तदेव

ततश्च प्रतिपत्तिर्ध्यानाचितादिशब्दवाच्या निदिध्यासनापरनामधेया । तथा च श्रुत्युक्तयोगविधिना निदिध्यासने कृते तदनन्तरं देहादिविलक्षणात्मसाक्षात्कारे सति तत्त्वज्ञानानन्तरं देहादौ अहमित्यभिमानरूपमिथ्याज्ञानस्य निवृत्तिर्भवति । तथा सति धर्माधर्मयोरभावे भोगेन प्रारब्धस्य कर्मणः क्षयात्तथा भोगेन सञ्चितानां कर्मणां विनाशे उपात्तदेहविनाशे आगामिजन्मनः कारणाभावात् पुनरनुत्पत्तौ सर्वदुःखध्वंसरूपः परमो मोक्ष उत्पद्यते । ननु श्रवणमननादिना आत्मसाक्षात्कारो भवति तर्हि कथं न्यायवैशेषिकदर्शनस्य प्रयोजनमिति चेत् , अत्रोच्यते श्रतिवाक्येभ्यः आत्मनः इतरभेदानुमाने न्यायवैशेषिकदर्शनस्य प्रयोजनं सर्वैः स्वीकृतमेव । तत्र न्यायदर्शनस्य चतुर्थसूत्रे महर्षिणा परमकारुणिकेन प्रत्यक्षप्रमाणस्य लक्षणं क्रियते। तत्रत्यानां व्याकरणघटितन्यायसिद्धान्तानां यथामति चर्चा क्रियते ।

**2. शोधः (मुख्यांशः)**

**<u>प्रत्यक्षशब्दस्य व्याकरणगतव्युत्पत्तिः</u>** -

तत्र प्रमाणान्तर्गतेषु प्रत्यक्षस्य लक्षणविषये परमकारुणिकेन महर्षिणा गौतमेन चतुर्थे सूत्रे उच्यते ‘इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ’[4] इति। अत्र प्रत्यक्षशब्दस्य व्युत्पत्तिं प्रदर्शयता भाष्यकारेण वात्स्यायनेन ‘अक्षस्य अक्षस्य प्रति वर्तते ’ इति । यद्यपि न्यायवार्तिककारेण उद्योतकरेण अयं आर्थनिर्देशरूपेण एव गृह्यते ,न तु समासस्य विग्रहवाक्यरूपेण इति । तद्यदि न भवति तदा षष्ठी तु श्रुता एव न स्यात् । अक्षम् अक्षं प्रति वर्तते इति प्रत्यक्षमित्यत्र वीप्सार्थे अव्ययीभावसमासः अभवत् । अत्रार्थे मानं भवति पाणिनीयं ‘अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु’[5] इति सूत्रम् । भाष्यकारस्य वात्स्यायनस्य मतवादं समर्थयता वार्तिककारेण उद्योत्करेण अपि प्रत्यक्षशब्दे प्रादिसमास एव स्वीक्रियते । किं बहुना, वृत्तिकारेण श्रीमद्विश्वनाथन्यायपञ्चाननेन अपि प्रादिसमासः एव स्वीक्रियतः। अधुना एका जिज्ञासा स्वाभाविकी यत् अत्र प्रादिसमासस्वीकारे कस्तावत् युक्तिरिति , अत्रोच्यते अव्ययीभावसमासनिष्पन्नं पदं सर्वदा एव अव्ययत्वात् तस्य नित्यं क्लीवलिङ्गे एव प्रयोगः भवति । किन्तु प्रत्यक्षशब्दस्तु सर्वथा क्लीवलिङ्गे एव प्रयुज्यते इति न । यतो हि अक्षेण प्रतीतः प्रत्यक्षः घटः , प्रत्यक्षा नदी इत्येवं प्रकारेण तस्य पुंलिङ्गे क्वचिच्च स्त्रीलिङ्गेऽपि प्रयोगः दृश्यते । न्यायमञ्जरीकारः जयन्तभट्टोऽपि अत्र प्रत्यक्षशब्दस्य अव्ययीभावसमासः न स्वीकुरुते । ‘प्रतिगतमक्षं प्रत्यक्षम् ’ इत्यर्थे अक्षेण प्रतीतम् इत्यर्थे वा ‘अत्यादयः क्रान्ताद्यर्थे द्वितीयया ’ इति नियमेन प्रादिसमासे प्रत्यक्षशब्दस्य निष्पत्तिर्भवति । प्रत्यक्षशब्दस्य निष्पत्तेः अनन्तरं किं तावत् अस्य लिङ्गं भवेदिति महती जिज्ञासा , द्वन्द्वसमासे तथा तत्पुरुषसमासे लिङ्गं परवत् भवति नाम उत्तरपदस्य समानवत् भवति । यतो हि अत्र अक्षशब्दः उत्तरपदरूपेण अस्ति तथाहि समासे अक्षशब्दवत् क्लीवलिङ्गमेव प्राप्नोति । अत्रार्थे च प्रमाणं भवति ‘परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः’[6] इति पाणिनीयं सूत्रम् । अनेन सूत्रेण यद्यपि प्रत्यक्षशब्दोत्तरं क्लीवत्वं प्राप्तमासीत् तथापि तन्न भवति ‘द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः’ इति वार्तिकबलात् । तथाहि प्रत्यक्षा बुद्धिः , प्रत्यक्षः घटः इत्यादिप्रयोगे न कापि हानिः । ‘प्रतिगतमक्षं प्रत्यक्षम्’ इत्यत्र प्रत्यक्षशब्दः प्रादितत्पुरुषसमासनिष्पन्नः । तत्पुरुषसमासस्य उत्तरपदार्थप्रधानत्वात् प्रत्यक्षमित्यत्र अक्षशब्दस्य प्राधान्यात् प्रत्यक्षशब्दः इन्द्रियवाची । अर्वाचीनमते प्रत्यक्षप्रमायाः जनकं भवति इन्द्रियम् । तच्च इन्द्रियम् इन्द्रियार्थसन्निकर्षं द्वारीकृत्य प्रत्यक्षप्रमां जनयति । ‘व्यापारवत्कारणं करणम्’ इति नव्यमतम् अधिकृत्य इन्द्रियं भवति प्रत्यक्षप्रमायाः करणम् । तस्मात् इन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् । केवलं व्युत्पत्त्या एव प्रत्यक्षशब्दं प्रत्यक्षप्रमाणं बोधयतीति न , अपि तु उद्देशलक्षणानुक्रमं विचार्य अपि वक्तुं शक्यते यत् अत्र प्रत्यक्षप्रमाणस्य एव लक्षणं कृतं महर्षिणा इति । आदौ भवति

[4] न्यायदर्शनम् (1.1.4)
[5] अष्टाध्यायी (2.1.6)
[6] तदेव (2.4.26)

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 6.471
Volume - 6, Issue - 8, August - 2023 Publication Date: 31/08/2023

पदार्थस्य उद्देशः तदनन्तरं भवति लक्षणमिति। अस्मात् सूत्रात् पूर्वं 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'[7] इति द्वितीयसूत्रे एव प्रत्यक्षप्रमाणस्य उद्देशः कृतः । अनन्तरं आलोच्यसूत्रे तस्य लक्षणं क्रियते इति । तथाहि वृत्तिकारेण उच्यते 'प्रस्तुतत्त्वाच्च करणलक्षणस्य ' इति । एवं व्युत्पत्त्या उद्देशानुसारेण वा प्रमाणस्य एव लक्षणमुचितम्

**3. प्रत्यक्षप्रमाणलक्षणसूत्रे 'यतः' इति पदस्य अध्याहारप्रयोजनम् :**

अत्र चतुर्थसूत्रे महर्षिणा प्रत्यक्षप्रमाणस्य एव लक्षणं कृतं, न तु प्रत्यक्षप्रमायाः इति वृत्तिकारस्य श्रीमद्विश्वनाथन्यायपञ्चाननस्य अयमाशयः इति । ननु प्रत्यक्षप्रमाणस्य लक्षणं क्रियते इत्युक्तम् , किन्तु तत्कथं ज्ञायते इति चेदुच्यते प्रत्यक्षशब्दस्य समानविभक्तिकविशेषणं भवति ज्ञानम् इति । तथाहि ज्ञानं प्रत्यक्षम् इत्यत्र समानविभक्तिकत्वात् सामानाधिकरण्यात् वा ज्ञानं प्रत्यक्षमिति बोध्यम् । तर्हि व्युत्पत्त्या उद्देशक्रमेण वा यद्यपि प्रमाणलक्षणमुचितं तथापि अत्र तन्न भवतीति तु निश्चप्रचम् । ज्ञानप्रत्यक्षयोः सामानाधिकरण्येऽपि सूत्रेण प्रत्यक्षप्रमाणस्य लक्षणं क्रियते तत्सुस्पष्टं भवति 'यतः' इति पदाध्याहारेण । तथाहि 'इन्द्रियार्थस्य सन्निकर्षात् यतः अव्यभिचारादिविशेषेणविशिष्टं ज्ञानं भवति तत् प्रत्यक्षम् ' इति सम्पूर्णं सूत्रशरीरम् अत्रानुसन्धेयम् इति। यस्मात् येन द्वारेण वा इन्द्रियार्थयोः सन्निकर्षवशात् ज्ञानं जायते तत् प्रत्यक्षमिति सूत्रार्थः समायाति । इन्द्रियार्थसन्निकर्षेण विना प्रत्यक्षज्ञानं न जायते । यद्यपि आलोकादयः तत्र सहकारिकारणत्वेन वर्तन्ते । तथाहि प्रत्यक्षज्ञाने ज्ञानान्तरं न कारणं , किन्तु इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति । तथाहि वृत्तिकारेण उच्यते 'ज्ञानाकरणकमित्यर्थः 'इति । 'ज्ञानाकरणकम्' इति पदं बहुव्रीहिसमासनिष्पन्नम् । 'ज्ञानम् अकरणकं यत्र वा ज्ञानं न करणं यत्र' इति विग्रहे त्रिपदसमानाधिकरणबहुव्रीहिसमासे निष्पन्नं ज्ञानाकरणमिति पदम् । ततश्च बहुव्रीहिसमासे कप्प्रत्यये ज्ञानाकरणकशब्दस्य निष्पत्तिः भवति । प्रत्यक्षज्ञानस्य विशेषणत्वात् नपुंसकलिङ्गे प्रथमैकवचनं ज्ञानाकरणकमिति । ईश्वरीयप्रत्यक्षस्य नित्यत्वात् , तज्-ज्ञानस्य कारणाभावाच्च तस्यापि प्रत्यक्षं ज्ञानाकरणकमेव भवति । 'ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् ' इत्येवं प्रत्यक्षलक्षणे कृते ईश्वरीयेऽपि प्रत्यक्षे न अव्याप्तिः , अपि च ज्ञानमात्रेऽपि नातिव्याप्तिः इति । तथाहि विश्वनाथन्यायपञ्चाननेन उच्यते –

'यद्वा इन्द्रियार्थसन्निकर्षोत्पन्नमिति सावधारणम् इन्द्रियार्थसन्निकर्षातिरिक्तादनुत्पन्नम्, अतिरिक्तं चाऽत्र ज्ञानम्, तेन ज्ञानाकरणकमित्यर्थः'[8] इति । अत एव एतत् स्पष्टं भवति यत् 'यतः' इति पदस्य अध्याहारेण एव प्रत्यक्षप्रमाणस्य लक्षणं सूचितं भवति । न्यायमञ्जरीकारेण जयन्तभट्टेन अपि यतः इति पदस्य अध्याहारः कर्तव्यः इत्युक्तम् । तथाहि उक्तं तेन

'तत्र च यद्वैयधिकरण्यं चोदितं तद् यतः शब्दाध्याहारेण परिहरिष्यामः । यत एवं यद्विशेषणविशिष्टं ज्ञानाख्यं फलं भवति तत् प्रत्यक्षम् इति सूत्रार्थः'[9] इति ।

[7] न्यायसूत्रम् (1.1.3)
[8] न्यायसूत्रवृत्तिः
[9] न्यायमञ्जरी

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 6.471
Volume - 6, Issue - 8, August - 2023 Publication Date: 31/08/2023

ननु प्रत्यक्षप्रमाणपरकरूपेण सूत्रस्य व्याख्या सम्भवेऽपि कथं प्रत्यक्षप्रमितिलक्षणरूपेण उच्यते इति। अत्रोच्यते आचार्येण विश्वनाथेन प्रमाणपदस्य अर्थः भवति प्रमितिकरणम् । एवम्प्रकारेण प्रत्यक्षप्रमाणं भवति प्रत्यक्षप्रमितिकरणं प्रत्यक्षप्रमाकरणं वा इति । सम्पूर्णस्य पदस्य अर्थावबोधे पदैकांशस्य अर्थावबोधः कारणं भवतीति प्रत्यक्षप्रमाकरणपदस्य अर्थावबोधे तदैकदेशस्य प्रत्यक्षप्रमायाः अर्थावबोधः प्रयोजनमिति । तथाहि पूर्वं कारणज्ञानम् आवश्यिकम् इति कृत्वा प्रत्यक्षप्रमायाः प्रत्यक्षप्रमितेः वा स्वरूपज्ञानं प्रयोजनम् । तथाहि प्रत्यक्षप्रमायाम् अवगतायां सत्यां तत्कारणं प्रत्यक्षप्रमाणस्वरूपमपि ज्ञातं भवति । तथाहि तत्सर्वं विचार्यता वृत्तिकारेण उच्यते –

‘अत्र प्रतिगतमक्षं प्रत्यक्षमिति योगादिन्द्रियवाचकत्वात् प्रत्यक्षशब्दस्य, प्रस्तुतत्वाच्च करणलक्षणस्य, प्रमितिलक्षणं यद्यप्यनुचितं तथापि यत् इत्यध्याहारेण प्रत्यक्षप्रमाकरणलक्षणे वाच्ये तदेकदेशप्रमास्वरूपे ज्ञाते तत्करणत्वं सुज्ञेयमित्याशयेन वा सङ्गमनीयम्’ [10]इति ।

**4. उपसंहृतिः**

प्रतिगतमक्षं प्रत्यक्षम् इति व्युत्पत्त्या प्रत्यक्षशब्दः इन्द्रियवाचकः भवति । किन्तु अत्र प्रत्यक्षशब्दस्य इन्द्रियवाचकत्वेऽपि प्रत्यक्षप्रमाणत्वं सुज्ञेयं न भवति। तदर्थं यतः इति पदस्य अध्याहारः कर्तव्यः इति सिद्धान्तः। तथाहि प्रत्यक्षप्रमास्य प्रत्यक्षप्रमायाः वा लक्षणं कृतमिति शङ्का निराकर्तुं विनिगमना नास्तीति पक्षः निरस्तः। तेन प्रमाणितं भवति प्रकृतन्यायसूत्रे प्रत्यक्षप्रमाणस्यैव लक्षणं कृतं महर्षिणा गौतमेन। एवम्प्रकारेण शोधपत्रेऽस्मिन् यथाशक्ति व्याकरणघटितानां न्यायसिद्धान्तानाम् आलोचनं कृतमिति शिवम्।

**सन्दर्भग्रन्थाः**


1. गौतमः, न्यायदर्शन् (प्रथमखण्डम्), फणिभूषणतर्कवागीशः., न्यायदर्शन् (प्रथमखण्डम्), कोलकाता, पश्चिमवङ्गराज्यपुस्तकपर्षत्, २०१८ ।
2. वात्स्यायनः, न्यायभाष्यम्, , सम्पा. स्वामी द्वारिकादासशास्त्री. वाराणसी, बौद्धभारती ,१९९८।
3. उद्योतकरः, न्यायवार्तिकम्, सम्पा. मृणालकान्ति-गङ्ग्योपाध्यायः, कोलकाता, संस्कृत-वुक्-डिपो २०२०।
4. जगदीशः, , शब्दशक्तिप्रकाशिका, सम्पा. ढुण्ढिराजशास्त्रि. वाराणसी, चौखम्भा प्रकाशनम्, २०२१ ।
5. पाणिनिः, , अष्टाध्यायी, सम्पा. श्रीदिवेन्द्रकुमारविद्यारत्नः. कोलकाता, वलरामप्रकाशनी, २००३।
6. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी(प्रथमो भागः), सम्पा. गिरिगधरशर्मा चतुर्वेदः परमेश्वरानन्दशर्मा विद्याभास्करः च ,वाराणसी, मोतीलाल बनारसीदास,२०१७।
7. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः), सम्पा. गिरिगधरशर्मा चतुर्वेदः परमेश्वरानन्दशर्मा विद्याभास्करः च , मोतीलाल बनारसीदास, २०१७।
8. वरदराजः, लघुसिद्धान्तकौमुदी,गीताप्रेस्-गोरखपुरम्।


[10] न्यायसूत्रवृत्तिः